राम रसायन महाकाव्यम्

रामायैव नमस्करोमि रघुवंशाम्भोधिसोमाय चो-
द्दामाशेषसुरारयो हि विहिता नामावशेषा भुवि
येन स्वीयसुकार्यसाधकतमो धीमान् हनूमान् कृतः
स्ववैंमानिक संस्तुताय जलदश्यामाभिरामाय ते ॥ १ ॥

श्यामाम्भोधरसप्रभा मधुरिमासीमाऽभिरामा निज-
रामायाः प्रणयेक्षण क्षणसरत्प्रेमोत्थरोमोद्गमा ॥
सोमाभाननसुन्दरा तनुरुचा कामावलेपापहा
कामानामभिवर्षिणी मम मुदे रामाभिधा देवता ॥ २ ॥

मौनीः पर्णकुटीरतुत्रुटदथो याऽपाटयत्तज्जटाः
यज्ञादींस्म मरीमृदीति निहता पापोत्कटा ताटका ॥
युक्तं हृत्कुहरे तु मे पुनरियं चाशापिशाच्यात्मना
सुस्था तामिह तृण्ढि पिण्ढि भगवन् त्वद्ध्यानयज्ञच्छिदम् ॥ ३ ॥

व्रात्या देव निषूदिताः कृतसती-हत्यापहत्यादिदु-
ष्कृत्यास्ते खरदूषणादय इयं स्तुत्या कृति यद्यपि ।
किंत्वन्तः खरदूषणावलिरियं क्रोधादिका मे स्थिता
तां तीव्रं जहि सन्निधेहि हृदयं त्वं पाहि मामेहि च ॥ ४ ॥

योऽभांक्षींदिक्षुभंजं शिवधनुरथ मां चोदवाक्षीदभोक्षीद्
योऽभांत्सीत्सिन्धुसेतुं दशवदनमथोऽपीपिषच्चूर्णपेषम् ॥
योऽधाक्षीत्तूलदाहं रिपुकुलमवनीं चाप्यभोक्षीदरक्षीत्
स श्रीरामस्तृणास्त्र स्तृणमिव दुरितं मे समस्तं तृणत्तु ॥ ५ ॥

Scanned by CamScanner

पुत्री यः कुशकाशकेन फणिना छत्री कलत्री पुनः
धात्र्या, तद्भव, सीतया च कलशीप्रोद्यत्तुलस्या तथा।
मित्री मर्कटभल्लकैरपि रथी यः पत्रिणार्कोडुप–
नेत्री गात्र्यपि मां गुणैः स च हरिः पात्रं कृपायाः क्रियात्॥ ६ ॥

रामायैव नमोऽस्तु मेऽखिलगुणग्रामाभिरामाय ते
क्षेमार्थं च जगत्त्रयस्य भुवने मानुष्यमातस्थुषे ॥
सोमार्कद्युतिदाशुषे दितिसुतस्तोमद्विषे श्रीजुषे
श्यामाम्भोदसमत्विषे भगवते भास्वज्जगज्ज्योतिषे ॥ ७ ॥

विश्वामित्र सुसत्रविघ्नकृदरिं हत्वा च मुक्त्वाम्बुधौ
संहृत्याध्वर नाशनाटक कुकृत्योद्घाटिकां ताटकाम्
सौशील्यक्षतिदीर्णगौतममनश्शल्यामहल्यामपि।
प्रोद्घृत्यैशधनुर्विभज्य दयितां भेजे विरेजे तया। ॥ ९ ॥

कामी दुर्दशकन्धरो जनकजामाहर्तुकामी यति–
वेषे तामपहृत्य पुष्पकविमानेनाग्रगामी ह्यभूत् ॥
अन्विष्यन्निव तामुरस्थितरमामुर्व्यां च लङ्कां गतो
हत्वा रावणमेत्य राजपदभाग् रामोऽभिरामो मुदे ॥ १० ॥

राकाशारदशर्वरीव गगनालंकार पूर्णेन्दुना
श्रीगोविन्द पदारविन्दजसरिन्मन्दाकिनी सिन्धुना ॥
हेम्नाच्छा मणिमंजरी प्रखरसद्धाम्ना दिनश्रीर्यथा
सीता राम समन्विता श्रियमिता शाताय शातोदरी ॥ ११ ॥